শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীলক্ষ্মীনৃসিংহাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীলক্ষ্মীনৃসিংহাষ্টোত্তরশতনামস্তোত্রম্ ॥

উগ্রং ৱীরং মহাৱিষ্ণুং জ্ৱলন্তং সর্ৱতোমুখম্।
নৃসিংহং ভীষণং ভদ্রং মৃত্যুমৃত্যুন্নমাম্যহম্॥

গর্জন্তং গর্জযন্তং নিজভুজপটলং স্ফোটযন্তং হঠন্তং
    রূপ্যন্তং তাপযন্তং দিৱি ভুৱি দিতিজং ক্ষেপযন্তং ক্ষিপন্তম্।
ক্রন্দন্তং ঘোষযন্তং দিশি দিশি সততং সংহরন্তং ভরন্তং
    ৱীক্ষন্তং ঘূর্ণযন্তং করনিকরশতৈর্দিৱ্যসিংহং নমামি॥

নারসিংহো মহাসিংহো দিৱ্যসিংহো মহাবলঃ।
উগ্রসিংহো মহাদেৱঃ স্তম্ভজশ্চোগ্রলোচনঃ॥ **1** ॥

রৌদ্রঃ সর্ৱাদ্ভুতঃ শ্রীমান্ যোগানন্দস্ত্রিৱিক্রমঃ।
হরিঃ কোলাহলশ্চক্রী ৱিজযী জযৱর্ধনঃ॥ **2** ॥

পঞ্চাননঃ পরব্রহ্ম চাঘোরো ঘোরৱিক্রমঃ।
জ্ৱলন্মুখো জ্ৱালমালী মহাজ্ৱালো মহাপ্রভুঃ॥ **3** ॥

নিটিলাক্ষঃ সহস্রাক্ষো দুর্নিরীক্ষ্যঃ প্রতাপনঃ।
মহাদংষ্ট্রাযুধঃ প্রাজ্ঞশ্চণ্ডকোপী সদাশিৱঃ॥ **4** ॥

হিরণ্যকশিপুধ্ৱংসী দৈত্যদানৱভঞ্জনঃ।
গুণভদ্রো মহাভদ্রো বলভদ্রঃ সুভদ্রকঃ॥ **5** ॥

করালো ৱিকরালশ্চ ৱিকর্তা সর্ৱকর্তৃকঃ।
শিংশুমারস্ত্রিলোকাত্মা ঈশঃ সর্ৱেশ্ৱরো ৱিভুঃ॥ **6** ॥

ভৈরৱাডংবরো দিৱ্যশ্চাচ্যুতঃ কৱিমাধৱঃ।
অধোক্ষজোঽক্ষরঃ শর্ৱো ৱনমালী ৱরপ্রদঃ॥ **7**॥

ৱিশ্ৱংভরোঽদ্ভুতো ভৱ্যঃ শ্রীৱিষ্ণুঃ পুরুষোত্তমঃ।
অনঘাস্ত্রো নখাস্ত্রশ্চ সূর্যজ্যোতিঃ সুরেশ্ৱরঃ॥ **8**॥

সহস্রবাহুঃ সর্ৱজ্ঞঃ সর্ৱসিদ্ধিপ্রদাযকঃ।
ৱজ্রদংষ্ট্রো ৱজ্রনখো মহানন্দঃ পরন্তপঃ॥ **9**॥

সর্ৱমন্ত্রৈকরূপশ্চ সর্ৱযন্ত্রৱিদারণঃ।
সর্ৱতন্ত্রাত্মকোঽৱ্যক্তঃ সুৱ্যক্তো ভক্তৱৎসলঃ॥ **10**॥

ৱৈশাখশুক্লভূতোত্থশরণাগতৱৎসলঃ।
উদারকীর্তিঃ পুণ্যাত্মা মহাত্মা চণ্ডৱিক্রমঃ॥ **11**॥

ৱেদত্রযপ্রপূজ্যশ্চ ভগৱান্ পরমেশ্ৱরঃ।
শ্রীৱৎসাঙ্কঃ শ্রীনিৱাসো জগদ্ৱ্যাপী জগন্মযঃ॥ **12**॥

জগৎপালো জগন্নাথো মহাকাযো দ্ৱিরূপভৃৎ।
পরমাত্মা পরঞ্জ্যোতির্নির্গুণশ্চ নৃকেসরী॥ **13**॥

পরতত্ত্ৱং পরন্ধাম সচ্চিদানন্দৱিগ্রহঃ।
লক্ষ্মীনৃসিংহঃ সর্ৱাত্মা ধীরঃ প্রহ্লাদপালকঃ॥ **14**॥

ইদং শ্রীমন্নৃসিংহস্য নাম্নাম্ অষ্টোত্তরং শতম্।
ত্রিসন্ধ্যং যঃ পঠেদ্ভক্ত্যা সর্ৱাভীষ্টমৱাপ্নুযাৎ॥ **15**॥

॥ ইতি শ্রীলক্ষ্মীনৃসিংহাষ্টোত্তরশতনামস্তোত্রং সমাপ্তম্॥